# दुर्गा गायत्री

ॐ कात्यायन्यै च विद्महे कन्याकुमार्यै च धीमहि
तन्नो दुर्गा प्रचोदयात् ॥

## Durga Gayatri

Om kaatyaayanyai cha vidmahe

kanyaakumaaryai cha dhimahi

Tannodurge prachodayaat

# श्री-महिषासुरमर्दिनी-स्तोत्रम्

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूतिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥1॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शंकरतोषिणि किल्विषमोषिणि घोषरते।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥2॥

अयि जगदम्बमदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणितुंगहिमालयशृंगनिजालय मध्यगते।
मधुमधुरे मधुकैटभगंजिनि कैटभभंजिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥3॥

अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्ड गजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशौण्ड मृगाधिपते।
निजभुजदण्ड निपातितचण्डविपातितमुण्डभटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥4॥

अयिरणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचारधुरीणमहाशिव दूतकृत्त प्रमथाधिपते।
दुरितदुरीह दुराशयदुर्मति दानवदूतकृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥5॥

अयि शरणागतवैरिवधूवर वीरवराभयदायकरे
त्रिभुवन मस्तक शूलविरोधि शिरोऽधिकृतामल शूलकरे।
दुमिदुमितामर दुन्दुभिनाद मुहुर्मुखरीकृत दिङ्निकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥6॥

अयि निजहुंकृतिमात्र निराकृत धूम्रविलोचन धूम्रशते
समरविशोषित शोणितबीज समुद्भवशोणित बीजलते।
शिव शिव शुम्भनिशुम्भमहाहव तर्पित भूत पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥7॥

धनुरनुषंग रणक्षणसंग परिस्फुरदंग नटत्कटके
कनक पिशंगपृषत्कनिषंगरसद्भटशृंग हतावटुके।
कृतचतुरंग बलक्षितिरंग घटद्बहुरंग रटद्वटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥8॥

जय जय जप्यजये जय शब्दपरस्तुति तत्पर विश्वनुते
झणझणझिञ्झिमि झिंकृतनूपुर शिंजितमोहित भूतपते।
नटितनटार्ध नटीनटनायक नाटितनाट्य सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥9॥

अयि सुमनः सुमनः सुमनः सुमनः सुमनोहर कान्तियुते
श्रितरजनी रजनी रजनी रजनी रजनीकर वक्त्रवृते।
सुनयनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥10॥

महितमहाहव वल्लभतल्लिक वल्लितरल्लित भल्लिरते
विरचितवल्लिक पल्लिकमल्लिक झिल्लिकभिल्लिक वर्गवृते।
श्रुतकृतफुल्ल समुल्लसितारुणतल्लजपल्लव सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥11॥

अविरलगण्डगलन्मदमेदुर मत्तमतंगज राजपते
त्रिभुवनभूषणभूतकलानिधि रूपपयोनिधि राजसुते।
अयि सुदतीजन लालसमानस मोहनमन्मथ राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥12॥

कमलदलामल कोमलकान्ति कलाकलितामल भाललते।
सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले।
अलिकुलसंकुल कुवलय मण्डल मौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥13॥

करमुरलीरववीजितकूजित लज्जितकोकिल मंजुमते
मिलितपुलिन्द मनोहरगुंजित रंजितशैल निकुंजगते।
निजगणभूत महाशबरीगण रंगणसम्भृत केलिरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥14॥

कटितटपीत दुकूलविचित्र मयूखतिरस्कृत चण्डरुचे
प्रणतसुरासुर मौलिमणिस्फुरदंशुलसन्नख चन्द्ररुचे ।
जितकनकाचल मौलिमदोर्जित निर्भरकुञ्जर कुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥15॥

विजित सहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक संगरतारक संगरतारक सूनुसुते।
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥16॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सु शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत्।
तव पदमेव परंपदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥17॥

कनकलसत्कल शीकजलैरनुषिञ्चति तेऽङ्गणरङ्गभुवम्
भजति स किं न शचीकुचकुंभ नटीपरिरम्भ सुखानुभवम्।
तवचरणं शरणं करवाणि मृडानि सदा मयि देहि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥18॥

तव विमलेन्दुकलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूतपुरीन्दुमुखी सुमुखीभिरसौ विमुखीक्रियते।
मम तु मतं शिवनामधने भवती कृपया किमु न क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥19॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननि कृपयासि यथासि तथाऽनुमितासिरते।
यदुचितमत्र भवत्युररी कुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥20॥

## Śrī-mahiṣāsuramardinī-stotram

Ayi girinandini nanditamedini viśvavinodini nandinute
Girivaravindhyaśiro'dhinivāsini viṣṇuvilāsini jiṣṇunute.
Bhagavati he śitikaṇṭhakuṭumbini bhūrikuṭumbini bhūtikṛte
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Suravaravarṣiṇi durdharadharṣiṇi durmukhamarṣiṇi harṣarate
Tribhuvanapoṣiṇi śaṅkaratoṣiṇi kilviṣamoṣiṇi ghoṣarate.
Danujaniroṣiṇi ditisutaroṣiṇi durmadaśoṣiṇi sindhusute
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi jagadambamadamba kadambavanapriyavāsini hāsarate
Śikhariśiromaṇituṅgahimālayaśṛṅganijālaya madhyagate.
Madhumadhure madhukaiṭabhagañjini kaiṭabhabhañjini rāsarate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi śatakhaṇḍa vikhaṇḍitaruṇḍa vituṇḍitaśuṇḍa gajādhipate
Ripugajagaṇḍa vidāraṇachaṇḍa parākramaśauṇḍa mṛgādhipate.
Nijabhujadaṇḍa nipātitachaṇḍavipātitamuṇḍabhaṭādhipate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayiraṇadurmada śatruvadhodita durdharanirjara śaktibhṛte
Chaturavichāradhurīṇamahāśiva dūtakṛtta pramathādhipate.
Duritaduriha durāśayadurmati dānavadūtakṛtāntamate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi śaraṇāgatavairivadhūvara vīravarābhayadāyakare
Tribhuvana mastaka śūlavirodhi śiro'dhikṛtāmala śūlakare.
Dumidumitāmara dundubhināda muhurmukharīkṛta diṅnikare
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi nijahuṅkṛtimātra nirākṛta dhūmravilochana dhūmraśate
Samaraviśoṣita śoṇitabīja samudbhavaśoṇita bījalate.
Śiva śiva śumbhaniśumbhamahāhava tarpita bhūta piśācharate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Dhanuranuṣaṅga raṇakṣaṇasaṅga parisphuradaṅga naṭatkaṭake
Kanaka piśaṅgapṛṣatkaniṣaṅgarasadbhaṭaśṛṅga hatāvaṭuke.
Kṛtachaturaṅga balakṣitiraṅga ghaṭadbahuraṅga raṭadvaṭuke
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Jaya jaya japyajaye jaya śabdaparastuti tatpara viśvanute
Jhaṇajhaṇajhiñjhimi jhiṅkṛtanūpura śiñjitamohita bhūtapate.
Naṭitanaṭārdha naṭīnaṭanāyaka nāṭitanāṭya sugānarate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi sumanaḥ sumanaḥ sumanaḥ sumanaḥ sumanohara kāntiyute
Śritarajanī rajanī rajanī rajanī rajanīkara vaktravṛte.
Sunayanavibhramarabhramarabhramara-bhramara-bhramarādhipate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Mahitamahāhava vallabhatallika vallitarallita bhallirate
Virachitavallika pallikamallika jhillikabhillika vargavṛte.
Śrutakṛtaphulla samullasitāruṇatallajapallava sallalite
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Aviralagaṇḍagalanmadamedura mattamataṅgaja rājapate
Tribhuvanabhūṣaṇabhūtakalānidhi rūpapayonidhi rājasute.
Ayi sudatījana lālasamānasa mohanamanmatha rājasute
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Kamaladalāmala komalakānti kalākalitāmala bhālalate.
Sakalavilāsa kalānilayakrama kelichalatkala haṃsakule.
Alikulasaṅkula kuvalaya maṇḍala maulimiladvakulālikule
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Karamuralīravavījitakūjita lajjitakokila mañjumate
Militapulinda manoharaguñjita rañjitaśaila nikuñjagate.
Nijagaṇabhūta mahāśabarīgaṇa raṅgaṇasambṛta kelirate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Kaṭitaṭapīta dukūlavichitra mayūkhatiraskṛta chaṇḍaruche
Praṇatasurāsura maulimaṇisphuradaṃśulasannakha chandraruche.
Jitakanakāchala maulimadorjita nirbharakuñjara kuṃbhakuche
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Vijita sahasrakaraika sahasrakaraika sahasrakaraikanute
Kṛtasuratāraka saṅgaratāraka saṅgaratāraka sūnusute.
Surathasamādhi samānasamādhi samādhisamādhi sujātarate

Padakamalaṃ karuṇānilaye varivasyati yo'nudinaṃ su śive
Ayi kamale kamalānilaye kamalānilayaḥ sa kathaṃ na bhavet.
Tava padameva parampadamityanuśīlayato mama kiṃ na śive
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Kanakalasatkala śīkajalairanuṣiñchati te'ṅgaṇaraṅgabhuvam
Bhajati sa kiṃ na śachīkuchakumbha naṭīparirambha sukhānubhavam.
Tavacharaṇaṃ śaraṇaṃ karavāṇi mṛḍāni sadā mayi dehi śivaṃ
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Tava vimalendukalaṃ vadanendumalaṃ sakalaṃ nanu kūlayate.
Kimu puruhūtapurīndumukhī sumukhībhirasau vimukhīkriyate.
Mama tu mataṃ śivanāmadhane bhavatī kṛpayā kimu na kriyate
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

Ayi mayi dīnadayālutayā kṛpayaiva tvayā bhavitavyamume
Ayi jagato janani kṛpayāsi yathāsi tathā'numitāsirate.
Yaduchitamatra bhavatyurarī kurutādurutāpamapākurute
Jaya jaya he mahiṣāsuramardini ramyakapardini śailasute.

## महामृत्युञ्जय मंत्र

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात् ॥

## गायत्री मन्त्र

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं ।
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

## दुर्गाद्वात्रिंशन्नाममाला

दुर्गा दुर्गार्तिशमनी दुर्गापद्विनिवारिणी ।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥

दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा ।
दुर्गमज्ञानदा दुर्ग दैत्यलोक दवानला ॥

दुर्गमा दुर्गमालोका दुर्गमात्मस्वरूपिणी ।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता ॥

दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी ।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी ॥

दुर्गमासुरसंहन्त्री दुर्गमायुधधारिणी ।
दुर्गमांगी दुर्गमता दुर्गम्या दुर्गमेश्वरी ॥

दुर्गभीमा दुर्गभामा दुर्गभा दुर्गदारिणी ।

## Mahamrityunjaya Mantra

*Sankalpa (Resolve): For healing, Energy, Power, Immunity and Strength*

Om Trayambakam Yajaamahe Sugandhim Pushtivardhanam

Urvaarukamiva Bandhanaat Mrityormukshiya Maamritaat

## Gayatri Mantra

*Sankalpa (Resolve): For Wisdom, Inner clarity, Intuitive Knowledge, Learning, Perception and Opening the dormant doors of intelligence*

Om Bhur Bhuvah Swaha Tat Savitur Varenyam

Bhargo Devasya Dheemahi Dhiyo Yo Nah Prachodayaat

## 32 Names of Durga

*Sankalpa (Resolve): For Overcoming and Removal of distress from life, Experiencing peace and harmony*

Durgaa Durgaartishamanee Durgaapadvinivaarinee
Durgamachedinee Durgasaadhinee Durgamaashinee

Durgatoddhaarinee Durganihantree Durgamaapahaa
Durgamajnaanadaa Durgadaityalokadavaanalaa

Durgamaa Durgamaalokaa Durgamaatmasvaroopinee
Durgamargapradaa Durgamavidyaa Durgamaashritaa

Durgamajnaanasamsthaanaa Durgamadhyaanabhaasinee
Durgamohaa Durgamagaa Durgamaarthasvaroopinee

Durgamaasurasamhantree Durgamaayudhadhaarinee
Durgamaangee Durgamataa Durgamyaa Durgameshwaree

Durgabheemaa Durgabhaamaa Durgabhaa Durgadaarinee

# Tantroktaṃ Devīsūktam

1. Namo devyai mahādevyai śivāyai satataṃ namaḥ.
   Namaḥ prakṛtyai bhadrāyai niyatāḥ praṇatāḥ sma tām.
2. Raudrāyai namo nityāyai gauryai dhātryai namo namaḥ.
   Jyotsnāyai chendurūpiṇyai sukhāyai satataṃ namaḥ.
3. Kalyāṇyai praṇatāṃ vṛddhyai siddhyai kurmo namo namaḥ.
   Nairṛtyai bhūbhṛtāṃ lakṣmyai śarvāṇyai te namo namaḥ.
4. Durgāyai durgapārāyai sārāyai sarvakāriṇyai.
   Khyātyai tathaiva kṛṣṇāyai dhūmrāyai satataṃ namaḥ.
5. Atisaumyātiraudrāyai natāstasyai namo namaḥ.
   Namo jagatpratiṣṭhāyai devyai kṛtyai namo namaḥ.
6. Yā devī sarvabhūteṣu viṣṇumāyeti śabditā.
   Namastasyai namastasyai namastasyai namo namaḥ.
7. Yā devī sarvabhūteṣu chetanetyabhidhīyate.
   Namastasyai namastasyai namastasyai namo namaḥ.
8. Yā devī sarvabhūteṣu buddhirūpeṇa saṃsthitā.
   Namastasyai namastasyai namastasyai namo namaḥ.
9. Yā devī sarvabhūteṣu nidrārūpeṇa saṃsthitā.
   Namastasyai namastasyai namastasyai namo namaḥ.
10. Yā devī sarvabhūteṣu kṣudhārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
11. Yā devī sarvabhūteṣu chhāyārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
12. Yā devī sarvabhūteṣu śaktirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
13. Yā devī sarvabhūteṣu tṛṣṇārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
14. Yā devī sarvabhūteṣu kṣāntirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
15. Yā devī sarvabhūteṣu jātirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
16. Yā devī sarvabhūteṣu lajjārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
17. Yā devī sarvabhūteṣu śāntirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
18. Yā devī sarvabhūteṣu śraddhārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
19. Yā devī sarvabhūteṣu kāntirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
20. Yā devī sarvabhūteṣu lakṣmīrūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
21. Yā devī sarvabhūteṣu vṛttirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
22. Yā devī sarvabhūteṣu smṛtirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
23. Yā devī sarvabhūteṣu dayārūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
24. Yā devī sarvabhūteṣu tuṣṭirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
25. Yā devī sarvabhūteṣu mātṛrūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
26. Yā devī sarvabhūteṣu bhrāntirūpeṇa saṃsthitā.
    Namastasyai namastasyai namastasyai namo namaḥ.
27. Indriyāṇāmadhiṣṭhātrī bhūtānāṃ chākhileṣu yā.
    Bhūteṣu satataṃ tasyai vyāptidevyai namo namaḥ.
28. Chitirūpeṇa yā kṛtsnametadvyāpya sthitā jagat.
    Namastasyai namastasyai namastasyai namo namaḥ.



# तन्त्रोक्तं देवीसूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै बिन्दुरूपिण्यै सुखायै सततं नमः ॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥

अतिसौम्यातिरौद्रायै नतास्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

## Devī-aparādha-kṣamāpana-stotram

1. Na mantraṃ no yantraṃ tadapi cha na jāne stutimaho
Na chāhvānaṃ dhyānaṃ tadapi cha na jāne stutikathāḥ.
Na jāne mudrāste tadapi cha na jāne vilapanaṃ
Paraṃ jāne mātastvadanusaraṇaṃ kleśaharaṇam.

2. Vidherajñānena draviṇavirahenālasatayā
Vidheyāśākyatvāttava charaṇayoryā chyutirabhūt.
Tadetatkṣantavyaṃ janani sakaloddhāriṇi śive
Kuputro jāyeta kvachidapi kumātā na bhavati.

3. Pṛthivyāṃ putrāste janani bahavaḥ santi saralāḥ
Paraṃ teṣāṃ madhye viralataralo'haṃ tava sutaḥ.
Madīyo'yaṃ tyāgaḥ samuchitamidaṃ no tava śive
Kuputro jāyeta kvachidapi kumātā na bhavati.

4. Jaganmātarmātastava charaṇasevā na rachitā
Na vā dattaṃ devi draviṇamapi bhūyastava mayā.
Tathāpi tvaṃ snehaṃ mayi nirupamaṃ yatprakuruṣe
Kuputro jāyeta kvachidapi kumātā na bhavati.

5. Parityaktā devā vividhavidhisevākulatayā
Mayā pañchāśīteradhikamapanīte tu vayasi.
Idānīṃ chenmātastava yadi kṛpā nāpi bhavitā
Nirālambo lambodarajanani kaṃ yāmi śāraṇam.

6. Śvapāko jalpāko bhavati madhupākopamagirā
Nirātaṅko raṅko viharati chiram koṭikanakaiḥ.
Tavāparṇe karṇe viśati manuvarṇe phalamidaṃ
Janaḥ ko jānīte janani japanīyaṃ japavidhau.

7. Chitābhasmālepo garalamaśanaṃ dikpaṭadharo
Jaṭādhārī kaṇṭhe bhujagapatihārī paśupatiḥ.
Kapālī bhūteśo bhajati jagadīśaikapadavīṃ
Bhavāni tvatpāṇigrahaṇaparipāṭīphalamidam.

8. Na mokṣasyākāṅkṣā bhavavibhavavāñchhāpi cha na me
Na vijñānāpekṣā śaśimukhi sukhechchhāpi na punaḥ.
Atastvāṃ saṃyāche janani jananaṃ yātu mama vai
Mṛḍānī rudrāṇī śiva-śiva bhavānīti japataḥ.

## देवी-अपराध-क्षमापन-स्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा:।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥1॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत्।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥2॥

पृथिव्यां पुत्रास्ते जननि बहव: सन्ति सरला:
परं तेषां मध्ये विरलतरलोऽहं तव सुत:।
मदीयोऽयं त्याग: समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥3॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥4॥

परित्यक्ता देवा विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥5॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकै:।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जन: को जानीते जननि जपनीयं जपविधौ ॥6॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपति:।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥7॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुन:।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव-शिव भवानीति जपत: ॥8॥

# श्री-देवी-अष्टोत्तर-शत-नामावलिः

1. ॐ आदिशक्तये नम:
2. ॐ महादेव्यै नम:
3. ॐ अम्बिकायै नम:
4. ॐ परमेश्वर्यै नम:
5. ॐ ईश्वर्यै नम:
6. ॐ अनीश्वर्यै नम:
7. ॐ योगिन्यै नम:
8. ॐ सर्वभूतेश्वर्यै नम:
9. ॐ जयायै नम:
10. ॐ विजयायै नम:
11. ॐ जयन्त्यै नम:
12. ॐ शाम्भव्यै नम:
13. ॐ शान्त्यै नम:
14. ॐ ब्राह्म्यै नम:
15. ॐ ब्रह्माण्डधारिण्यै नम:
16. ॐ महारूपायै नम:
17. ॐ महामायायै नम:
18. ॐ माहेश्वर्यै नम:
19. ॐ लोकरक्षिण्यै नम:
20. ॐ दुर्गायै नम:
21. ॐ दुर्गपारायै नम:
22. ॐ भक्तचिन्तामण्यै नम:
23. ॐ मृत्यै नम:
24. ॐ सिद्ध्यै नम:
25. ॐ मूर्त्यै नम:
26. ॐ सर्वसिद्धिप्रदायै नम:
27. ॐ मंत्रमूर्त्यै नम:
28. ॐ महाकाल्यै नम:
29. ॐ सर्वमूर्तिस्वरूपिण्यै नम:
30. ॐ वेदमूर्त्यै नम:
31. ॐ वेदभूत्यै नम:
32. ॐ वेदान्तायै नम:
33. ॐ व्यवहारिण्यै नम:
34. ॐ अनघायै नम:
35. ॐ भगवत्यै नम:
36. ॐ रौद्रायै नम:
37. ॐ रुद्रस्वरूपिण्यै नम:
38. ॐ नारायण्यै नम:
39. ॐ नारसिंह्यै नम:
40. ॐ नागयज्ञोपवीतिन्यै नम:
41. ॐ शंखचक्रगदाधारिण्यै नम:
42. ॐ जटामुकुटशोभिन्यै नम:
43. ॐ अप्रमाणायै नम:
44. ॐ प्रमाणायै नम:
45. ॐ आदिमध्यावसानायै नम:
46. ॐ पुण्यदायै नम:
47. ॐ पुण्योपचारिण्यै नम:
48. ॐ पुण्यकीर्त्यै नम:
49. ॐ स्तुतायै नम:
50. ॐ विशालाक्ष्यै नम:
51. ॐ गम्भीरायै नम:
52. ॐ रूपान्वितायै नम:
53. ॐ कालरात्र्यै नम:
54. ॐ अनल्पसिद्ध्यै नम:
55. ॐ कमलायै नम:
56. ॐ पद्मवासिन्यै नम:
57. ॐ महासरस्वत्यै नम:
58. ॐ मन:सिद्धायै नम:
59. ॐ मनोयोगिन्यै नम:
60. ॐ मातंगिन्यै नम:
61. ॐ चण्डमुण्डचारिण्यै नम:
62. ॐ दैत्यदानवनाशिन्यै नम:
63. ॐ मेषज्योतिषायै नम:
64. ॐ परंज्योतिषायै नम:
65. ॐ आत्मज्योतिषायै नम:
66. ॐ सर्वज्योतिस्वरूपिण्यै नम:
67. ॐ सहस्रमूर्त्यै नम:
68. ॐ शर्वाण्यै नम:
69. ॐ सूर्यमूर्तिस्वरूपिण्यै नम:
70. ॐ आयुर्लक्ष्म्यै नम:
71. ॐ विद्यालक्ष्म्यै नम:
72. ॐ सर्वलक्ष्मीप्रदायै नम:
73. ॐ विचक्षणायै नम:
74. ॐ क्षीरार्णववासिन्यै नम:
75. ॐ वागीश्वर्यै नम:
76. ॐ वाक्सिद्ध्यै नम:
77. ॐ अज्ञानज्ञानगोचरायै नम:
78. ॐ बलायै नम:
79. ॐ परमकल्याण्यै नम:
80. ॐ भानुमण्डलवासिन्यै नम:
81. ॐ अव्यक्तायै नम:
82. ॐ व्यक्तरूपायै नम:
83. ॐ अव्यक्तरूपायै नम:
84. ॐ अनन्तायै नम:
85. ॐ चन्द्रायै नम:
86. ॐ चन्द्रमण्डलवासिन्यै नम:
87. ॐ चन्द्रमण्डलमण्डितायै नम:
88. ॐ भैरव्यै नम:
89. ॐ परमानन्दायै नम:
90. ॐ शिवायै नम:
91. ॐ अपराजितायै नम:
92. ॐ ज्ञानप्राप्त्यै नम:
93. ॐ ज्ञानवत्यै नम:
94. ॐ ज्ञानमूर्त्यै नम:
95. ॐ कलावत्यै नम:
96. ॐ श्मशानवासिन्यै नम:
97. ॐ मात्रे नम:
98. ॐ परमकल्पिन्यै नम:
99. ॐ घोषवत्यै नम:
100. ॐ दारिद्र्यहारिण्यै नम:
101. ॐ शिवतेजोमुख्यै नम:
102. ॐ विष्णुवल्लभायै नम:
103. ॐ केशविभूषितायै नम:
104. ॐ कूर्मायै नम:
105. ॐ महिषासुरघातिन्यै नम:
106. ॐ सर्वरक्षायै नम:
107. ॐ महाकाल्यै नम:
108. ॐ महालक्ष्म्यै नम:

ॐ शान्ति: शान्ति: शान्ति: ॥



## Gaṅgā-stotram



*Jaya jaya gaṅge jaya hara gaṅge, jaya jaya gaṅge jaya hara gaṅge.*

1. Devi sureśvari bhagavati gaṅge tribhuvanatāriṇi taralataraṅge.
   Śaṅkaramaulivihāriṇi vimale mama matirāstāṃ tava padakamale.
2. Bhāgīrathi sukhadāyini mātastava jala mahimā nigame khyātaḥ.
   Nāhaṃ jāne tava mahimānaṃ pāhi kṛpāmayi māmajñānam.
3. Haripada pādya taraṅgiṇi gaṅge himavidhu muktā dhavala taraṅge.
   Dūrī kuru mama duṣkṛti bhāraṃ kuru kṛpayā bhavasāgara pāram.
4. Tava jalamamalaṃ yena nipītaṃ paramapadaṃ khalu tena gṛhītam.
   Mātargaṅge tvayi yo bhaktaḥ kila taṃ draṣṭuṃ na yamaḥ śaktaḥ.
5. Patitoddhāriṇi jāhnavi gaṅge khaṇḍitagirivaramaṇḍita bhaṅge.
   Bhīṣma janani he munivara kanye patitanivāriṇi tribhuvana dhanye.
6. Kalpalatāmiva phaladāṃ loke praṇamati yastvāṃ na patati śoke.
   Pārāvāra vihāriṇi gaṅge vimukha yuvati kṛta taralāpāṅge.
7. Tava chenmātaḥ srotaḥ snātaḥ punarapi jaṭhare so'pi na jātaḥ.
   Narakanivāriṇi jāhnavi gaṅge kaluṣavināśini mahimottuṅge.
8. Punarasadaṅge puṇyataraṅge jaya jaya jāhnavi karuṇāpāṅge.
   Indramukuṭamaṇirājita charaṇe sukhade śubhade bhṛtya śaraṇye.
9. Rogaṃ śokaṃ tāpaṃ pāpaṃ hara me bhagavati kumati kalāpam.
   Tribhuvana sāre vasudhā hāre tvamasi gatirmama khalu saṃsāre.
10. Alakānande paramānande kuru karuṇāmayi kātara vandye.
    Tava taṭa nikaṭe yasya nivāsaḥ khalu vaikuṇṭhe tasya nivāsaḥ.
11. Varamiha nīre kamaṭho mīnaḥ kiṃ vā tīre śaraṭaḥ kṣīṇaḥ.
    Athavā śvapacho malino dīnastava na hi dūre nṛpatikulīnaḥ.
12. Bho bhuvaneśvari puṇye dhanye devi dravamayi munivara kanye.
    *Jaya jaya gaṅge jaya hara gaṅge, jaya jaya gaṅge jaya hara gaṅge.*

## गंगा-स्तोत्रम्

जय जय गंगे जय हर गंगे जय जय गंगे जय हर गंगे।

देवि सुरेश्वरि भगवति गंगे त्रिभुवनतारिणि तरलतरंगे।
शंकरमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥1॥

भागीरथि सुखदायिनि मातस्तव जल महिमा निगमे ख्यात:।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥2॥

हरिपद पाद्य तरंगिणि गंगे हिमविधु मुक्ता धवल तरंगे।
दूरी कुरु मम दुष्कृति भारं कुरु कृपया भवसागर पारम् ॥3॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम्।
मातर्गंगे त्वयि यो भक्त: किल तं द्रष्टुं न यम: शक्त: ॥4॥

पतितोद्धारिणि जाह्नवि गंगे खण्डितगिरिवरमण्डित भंगे।
भीष्म जननि हे मुनिवर कन्ये पतितनिवारिणि त्रिभुवन धन्ये ॥5॥

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके।
पारावार विहारिणि गंगे विमुख युवति कृत तरलापांगे ॥6॥

तव चेन्मात: स्रोत: स्नात: पुनरपि जठरे सोऽपि न जात:।
नरकनिवारिणि जाह्नवि गंगे कलुषविनाशिनि महिमोत्तुंगे ॥7॥

पुनरसदंगे पुण्यतरंगे जय जय जाह्नवि करुणापांगे।
इन्द्रमुकुटमणिराजित चरणे सुखदे शुभदे भृत्य शरण्ये ॥8॥

रोगं शोकं तापं पापं हर मे भगवति कुमति कलापम्।
त्रिभुवन सारे वसुधा हारे त्वमसि गतिर्मम खलु संसारे ॥9॥


अलकानन्दे परमानन्दे कुरु करुणामयि कातर वन्द्ये।
तव तट निकटे यस्य निवास: खलु वैकुण्ठे तस्य निवास: ॥10॥

वरमिह नीरे कमठो मीन: किं वा तीरे शरट: क्षीण:।
अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीन: ॥11॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवर कन्ये।
जय जय गंगे जय हर गंगे जय जय गंगे जय हर गंगे ॥12॥

ॐ शान्ति: शान्ति: शान्ति: ॥

# देवी



## आराधना

वेदभूमि भारत से मैया वैदिक विश्व बना दो,
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो।

मैहर वाली शारदा मैया, कलकत्ते की काली मैया
विन्ध्याचल की विन्ध्यवासिनी, वृन्दावन की कात्यायनी
हरिद्वार की मनसा देवी, पुष्कर की गायत्री देवी
पूर्ण गिरि की कालिका मैया, कर्नाटक की दुर्गा मैया
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥1॥

मिथिला की मिथिलेश्वरी देवी, पटना की पटनेश्वरी देवी
वैष्णव देवी जम्मू वाली, त्रिपुर सुन्दरी त्रिपुरा वाली
चित्रकूट की मैया शिवानी, श्रीनगर की छीर भवानी
मुम्बई वाली मुम्बा देवी, पार्वती देवी पूनावाली
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥2॥

अल्मोड़ा की मैया कौशकी, शिमलावाली मैया कोटकी
आबू वाली देवी अर्बुदा, महुआ वाली मैया चन्द्रिका
मदुरै वाली माँ मीनाक्षी, काशी की माँ विशालाक्षी
काठमाण्डू की गुह्येश्वरी माँ, कांगड़ा वाली पिठेश्वरी माँ
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥3॥

कोल्हापुर की महिष-मर्दनी, जालंधर की त्रिपुरमालिनी
जूनागढ़ की देवी अम्बा, श्रीशैलम की खम्भारम्भा
ओमकारेश्वर सप्त मात्रिका, पण्ढरपुर की देवी राधिका
वर्धमान की देवी बगुला, विमला देवी पुरी की मैया
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥4॥

कांगड़ा वाली चिंतपूर्णि, द्वारका वाली मैया रुक्मिणी
नैनीताल की नैना देवी, ज्वालामुखी की ज्वाला देवी
तिरुपति की पद्मावती मैया, बंगलादेश की भगवति मैया
जनकपुर की सीता मैया, चुनार वाली दुर्गा मैया
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥5॥

दिल्ली की योगमाया कालिका, मथुरावाली देवी राधिका
त्यागराज की ललिता देवी, मद्रास की कुलका देवी
सहस्र चण्डी मानकपुर की, गौरीशंकर जबलपुर की
गोवा की शांता दुर्गा माँ, मुदगलपुर की चण्डी मैया
गौहाटी की माँ कामाख्या, मैसूर वाली माँ चामुण्डा
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥6॥

पंचवटी की भद्रकाली माँ, दलहाटी की महाकाली माँ
करोली वाली केला देवी, विरजाक्षेत्र की विरजा देवी
पाकिस्तान की मैया कोटरी, हिंगलाज की हिंगुला देवी
इन्दरगढ़ की इन्द्राणी माँ, आसनसोल की कपालिनी माँ
साकम्बरी सहारनपुर की, देवी नन्दिनी नन्दीपुर की
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो ॥7॥

वेदभूमि भारत से मैया, वैदिक विश्व बना दो।
पीताम्बरा पराशक्ति माँ वैदिक विश्व बना दो।
जहाँ हो मैया वहीं से जल्दी वैदिक विश्व बना दो।

मां मायात् सर्वतो रक्ष श्रियं वर्द्धय सर्वदा ।
शरीरारोग्यं मे देहि देव देव नमोस्तुते ॥

*उत्तम स्वास्थ्य प्राप्त करने के लिए इस मन्त्र का जप करें।*

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी।
एवमेव त्वयाकार्यमस्मद् वैरिविनाशनम् ॥

*कठिनाइयों और बाधाओं को दूर करने के लिए इस मन्त्र का जप करें।*

# Devi



## Aaraadhanaa

Vedabhumi bhaarata se maiyaa
vaidika vishva banaa do
Jahaan ho maiyaa vahi se jaldi
vaidika vishva banaa do

1. Maihara vaali shaaradaa maiyaa,
kalakatte ki kaali maiyaa
Vindhyaachala ki vindhyavaasini,
vrindaavana ki kaatyaayani
Haridvaara ki manasaa devi,
pushkara ki gaayatri devi
Purna giri ki kaalikaa maiyaa,
karnaataka ki durgaa maiyaa
*Jahaan ho maiyaa...*

2. Mithilaa ki mithileshvari devi,
patanaa ki pataneshvari devi
Vaishnava devi jammu vaali,
tripura sundari tripuraa vaali
Chitrakuta ki maiyaa shivaani,
shrinagara ki chhira bhavaani
Mumbai vaali mumbaa devi,
paarvati devi punaavaali
*Jahaan ho maiyaa...*

3. Almoraa ki maiyaa kaushaki,
shimalaavaali maiyaa kotaki
Aabu vaali devi arbudaa,
mahuaa vaali maiyaa chandrikaa
Madurai vaali maa minaakshi,
kaashi ki maa vishaalaakshi
Kaathamaandu ki guhyeshvari maa,
kaangaraa vaali pitheshvari maa
*Jahaan ho maiyaa...*

4. Kolhaapura ki mahisha-mardani,
jaalandhara ki tripuramaalini
Junaagarha ki devi ambaa,
shrishailama ki khambhaarambhaa
Omakaareshvara sapta maatrikaa,
pandharapura ki devi raadhikaa
Vardhamaana ki devi bagulaa,
vimalaa devi puri ki maiyaa
*Jahaan ho maiyaa...*

5. Kaangaraa vaali chintapurni,
dvaarakaa vaali maiyaa rukmini
Nainitaala ki nainaa devi,
jvaalaamukhi ki jvaalaa devi
Tirupati ki padmaavati maiyaa,
bangalaadesha ki bhagavati maiyaa
Janakapura ki sitaa maiyaa,
chunaara vaali durgaa maiyaa
*Jahaan ho maiyaa...*

6. Dilli ki yogamaayaa kaalikaa,
mathuraavaali devi raadhikaa
Tyaagaraaja ki lalitaa devi,
madraasa ki kulakaa devi
Sahasra chandi maanakapura ki,
gaurishankara jabalapura ki
Govaa ki shaantaa durgaa maa,
mudagalapura ki chandi maiyaa
Gauhaati ki maa kaamaakhyaa,
maisura vaali maa chaamundaa
*Jahaan ho maiyaa...*

7. Panchavati ki bhadrakaali maa,
dalahaati ki mahaakaali maa
Karoli vaali kelaa devi,
virajaakshetra ki virajaa devi
Paakistaana ki maiyaa kotari,
hingalaaja ki hingulaa devi
Indaragarha ki indraani maa,
aasanasola ki kapaalini maa
Saakambari sahaaranapura ki,
devi nandini nandipura ki
*Jahaan ho maiyaa...*

Vedabhumi bhaarata se maiyaa
vaidika vishva banaa do.
Pitaambaraa paraashakti maa
vaidika vishva banaa do.
Jaahan ho maiyaa vahi se jaldi
vaidika vishva banaa do.

# वैदिक शान्ति मन्त्र

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद-सादनम्। ॐ हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्। ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये अम्बिकापतये उमापतये पशुपतये नमो नमः॥ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्व रेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः। नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च। व्यासं शुकं गौड़पदं महान्तं गोविन्दयोगीन्द्रमथास्यशिष्यम्। श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्। तं त्रोटकं वार्तिककारमन्यानस्मत्गुरुम् सन्ततमानतोऽस्मि। श्रुतिस्मृतिपुराणानामालयं करुणालयम्। नमामि भगवत्पादं शंकरं लोकशंकरम्। शंकरं शंकराचार्यं केशवं बादरायणम्। सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः। ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने। व्योमवद्व्याप्तदेहाय श्री दक्षिणामूर्तये नमः। यस्य देवे पराभक्तिः यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः। ॐ शान्तिः शान्तिः शान्तिः॥

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम। ॐ शान्तिः शान्तिः शान्तिः॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। ॐ शान्तिः शान्तिः शान्तिः॥

# Vaidika Śānti Mantra

. Om gaṇānāṃ tvā gaṇapatigvaṃ havāmahe kaviṃ kavīnāmupamaśravastamam. Jyeṣṭharājaṃ brahmaṇāṃ brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam. Om haṃsa haṃsāya vidmahe paramahaṃsāya dhīmahi. Tanno haṃsaḥ prachodayāt. Om namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarūpāya hiraṇyapataye ambikāpataye umāpataye paśupataye namo namaḥ.
Ṛtagvaṃ satyaṃ paraṃ brahma puruṣaṃ kṛṣṇapiṅgalam. Ūrdhva retaṃ virūpākṣaṃ viśvarūpāya vai namo namaḥ.
Om śāntiḥ śāntiḥ śāntiḥ.

. Om namo brahmādibhyo brahmavidyāsampradāya-kartṛbhyo vaṃśarṣibhyo namo gurubhyaḥ. Nārāyaṇaṃ padmabhavaṃ vasiṣṭhaṃ śaktiṃ cha tatputraparāśaraṃ cha. Vyāsaṃ śukaṃ gauḍapadaṃ mahāntaṃ govinda-yogīndramathāsyaśiṣyam. Śrī śaṅkarāchāryamathāsya padmapādaṃ cha hastāmalakaṃ cha śiṣyam. Taṃ troṭakaṃ vārtikakāramanyānasmatgurum santatamānato'smi. Srutismṛtipurāṇānāmālayaṃ karuṇālayam. Namāmi bhagavatpādaṃ śaṅkaraṃ lokaśaṅkaram. Śaṅkaraṃ śaṅkarāchāryaṃ keśavaṃ bādarāyaṇam. Sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ. Īśvaro gururātmeti mūrttibhedavibhāgine. Vyomavadvyāptadehāya śrī dakṣiṇāmūrttaye namaḥ. Yasya deve parābhaktiḥ yathā deve tathā gurau. Tasyaite kathitā hyarthā prakāśante mahātmanaḥ. Om śāntiḥ śāntiḥ śāntiḥ.

. Om agne naya supathā rāye asmān viśvāni deva vayunāni vidvān. Yuyodhyasmajjuhurāṇameno bhūyiṣṭhāṃ te nama uktiṃ vidhema. Om śāntiḥ śāntiḥ śāntiḥ.

. Om pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudachyate. Pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate. Om śāntiḥ śāntiḥ śāntiḥ.